सर्ववेदान्तसिद्धान्त
गोचरं तमगोचरम् ।
गोविन्दं परमानन्दं
सद्गुरुं प्रणतोऽस्म्यहम् ॥ १ ॥

sarva-vedānta-siddhānta-
gocaraṁ tam agocaram
govindaṁ param-ānandaṁ
sad-guruṁ praṇato'smy aham

दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम् ।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥ २ ॥

durlabhaṁ trayam evaitad
devānugraha-hetukam
manuṣyatvaṁ mumukṣutvaṁ
mahā-puruṣa-saṁśrayaḥ

लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं
तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् ।
यस्त्वात्ममुक्त्यै न यतेत मूढधीः
स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ॥ ४ ॥

labdhvā kathancin nara-janma durlabhaṁ
tatrāpi puṁstvaṁ śruti-pāradarśanam
yastv ātma-muktyai na yateta mūḍhadhīḥ
sa hy ātmahā svaṁ vinihanty asad-grahāt

वदन्तु शास्त्राणि यजन्तु देवान्
कुर्वन्तु कर्माणि भजन्तु देवताः ।
आत्मैक्यबोधेन विनापि मुक्तिः
न सिद्ध्यति ब्रह्मशतान्तरेऽपि ॥ ६ ॥

vadantu śāstrāṇi yajantu devān
kurvantu karmāṇi bhajantu devatāḥ
ātmaikya-bodhena vināpi muktiḥ
na siddhyati brahma-śatāntare 'pi

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये।
वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः ॥ ११ ॥

cittasya śuddhaye karma
na tu vastūpalabdhaye
vastu-siddhir vicāreṇa
na kiñcit karma-koṭibhiḥ

अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः।
उपाया देशकालाद्याः सन्त्यस्मिन्सहकारिणः॥ १४ ॥

adhikāriṇam āśāste
phala-siddhir viśeṣataḥ
upāyā deśa-kālādyāḥ
santy asmin saha-kāriṇaḥ

अतो विचारः कर्तव्यो जिज्ञासोरात्मवस्तुनः॥
समासाद्य दयासिन्धुं गुरुं ब्रह्मविदुत्तमम्॥ १५ ॥

ato vicāraḥ kartavyo
jijñāsor ātma-vastunaḥ
samāsādya dayā-sindhuṁ
guruṁ brahmavid uttamam

साधनान्यत्र चत्वारि कथितानि मनीषिभिः।
येषु सत्स्वेव सन्निष्ठा यदभावे न सिध्यति॥ १८ ॥

sādhanānyatra catvāri
kathitāni manīṣibhiḥ
yeṣu satsveva sanniṣṭhā
yad-abhāve na sidhyati

आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।
इहामुत्रफलभोगविरागस्तदनन्तरम् ।
शमादिषटसम्पत्तिर्मुमुक्षुत्वमिति स्फुटम् ॥ १९ ॥

ādau nityānitya-vastu-vivekaḥ parigaṇyate
ihāmutra-phala-bhoga-virāgas tad-anantaram
śamādi-ṣaṭka-sampattir mumukṣutvam
iti sphuṭam

ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः ।
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः ॥ २० ॥

brahma satyaṁ jagan mithyety
evaṁ rūpo viniścayaḥ
so'yaṁ nityānitya-vastu-
vivekaḥ samudāhṛtaḥ

तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः ।
देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि ॥ २१ ॥

tad vairāgyaṁ jihāsā yā
darśana-śravaṇādibhiḥ
dehādi-brahma-paryante
hy anitye bhoga-vastuni

विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः ।
स्वलक्ष्ये नियतावस्था मनसः शम उच्यते ॥ २२ ॥

virajya viṣaya-vrātād
doṣa-dṛṣṭyā muhur muhuḥ
svalakṣye niyatāvasthā
manasaḥ śama ucyate

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके ।
उभयेषामिन्द्रियाणां स दमः परिकीर्तितः ।
बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा ॥ २३ ॥

viṣayebhyaḥ parāvartya sthāpanaṁ svasva-golake
ubhayeṣām indriyāṇāṁ sa damaḥ parikīrtitaḥ
bāhyān ālambanaṁ vṛtter eṣoparatir uttamā

सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ।
चिन्ताविलापरहितं सा तितिक्षा निगद्यते ॥ २४ ॥

sahanaṁ sarva-duḥkhānām
apratīkāra-pūrvakam
cintā-vilāpa-rahitaṁ
sā titikṣā nigadyate

शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम् ।
सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ॥ २५ ॥

śāstrasya guru-vākyasya
satya-buddhy-avadhāraṇam
sā śraddhā kathitā sadbhir
yayā vastūpalabhyate